"तेजस्वदस्तु सुखम्" तैत्ति० १।७,७।२। स्त्रियां ङीप् सा च २गजपिप्पल्यां शब्दरत्ना० ३चविकायां रत्नमाला ४महाज्योतिष्मत्यां राजनि०। अत्र संज्ञात्वेन सान्तत्वात् सस्य पदत्वाभावे तेजोवतीत्यपि तत्रार्थे।

**तेजस्विन्** त्रि० तेजस्+अस्त्यर्थे विनि। तेजोयुक्ते "तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते" माघः। स्त्रियां ङीप्। सा च २ज्योतिष्मतीलतायां शब्दर०। ३महाज्योतिष्मतीलतायाम् राजनि०। "तेजोस्विनी कफश्वासकासाऽऽस्यामयवातहृत्। पाचन्युष्णा कटुस्तिक्तारुचिवह्निप्रदीपनी" भावप्र०।

**तेजित** त्रि० तिज-णिच्-क्त। शाणिते तीक्ष्णीकृते अमरः

**तेजिष्ठ** त्रि० तेजस्विन्+अतिशये इष्ठन् विनेर्लुकि डिद्भावः। अतिशयेन तेजस्विनि। "तेजिष्ठया तिग्मिवस्य वर्तनी" ऋ०१।५२,८।

**तेजीयस्** त्रि० तेजस्विन्+अतिशये ईयसुन् विनेर्लुकि डिद्भावः। अतितेजस्विनि। "तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा" भाग० १०।३३।२९। स्त्रियां ङीप्।

**तेजेयु** पु०रौद्राश्वनृपस्य पुत्रभेदे। "रौद्राश्वस्य महेष्वासा दशाप्सरसि सम्भवाः" इत्युपक्रमे। "तेजेयुर्बलवान् धीमान् सत्येयुश्चेन्द्रविक्रमः" भा० आ० ९४ अ०।

**तेजोनाथ** तीर्थभेदे शिवपु० दृश्यम्। [रत्नमा०।

**तेजोमन्थ** पु०तेजो मथ्नाति मन्थ-अण्। गणिकारिकायाम्।

**तेजोमय** त्रि० तेजस्+प्रचुरार्थे विकारे वा मयट्। १तेजःप्रचुरे २तेजोविकारे ३ज्योतिर्मये च। स्त्रियां ङीप्। "तेजोमयी वाक्" इति छा०उ० श्रुतिः। "तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः" मनुः।

**तेजोमात्रा** स्त्री तेजसां सत्त्वगुणानां मात्रांऽशः। इन्द्रियेषु भूतानां सात्त्विकांशेभ्य एव तेषामुत्पत्तिः सांख्यसिद्धा।

**तेजोमूर्ति** पु० तेजस्तेजस्वती मूर्त्तिर्यस्य। १सूर्य्ये २तेजआत्मके ३तेजःप्रचुरे च त्रि०। "स गच्छति परं स्थानं तेजोमूर्त्तिः पथर्जुना" मनुः।

**तेजोरूप** न० तेजः सर्वप्रकाशकं चैतन्यं रूपं स्वरूपं यस्य। ज्योतीरूपे प्रकाशात्मके ब्रह्मणि "अशरीरं विग्रहवदिन्द्रियवदतीन्द्रियम्। यदसाक्षि सर्वसाक्षि तेजोरूपं नमाम्यहम्" ब्रह्मवै० पु०। ६त०। २तेजसो रूपे च अग्निशब्दे तद्रूपं दर्शितम्।

**तेजोवत्** त्रि०तेजस्+अस्त्यर्थे मतुप् मस्य वः बा०न पदत्वम्। तेजोयुक्ते स्त्रियां ङीप्। सा च (तेजस्वत्)शब्दोक्तार्थेषु। "तेजोवता लोकगणेन सार्द्धम्" मत्स्यपु०।अग्न्यावाहनमन्त्रः।

**तेजोविन्दु** पु०उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।[राजनि०।

**तेजोवृक्ष** पु० तेजोयुक्तः वृक्षः शा० त०। क्षुद्राग्निमन्थवृक्षे

**तेजोवृत्त** न० तेजसः वीर्य्यस्यानुरूपं वृत्तम्। वीर्य्यानुरूपचरिते। "इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च। चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत्" मनुः।

**तेजोह्वा** स्त्री तेजः ह्वयते स्पर्द्धते ह्वे-क। तेजस्विन्यां लतायाम् भावप्र०। "कम्पिल्लकं ससिन्दूरं तेजोह्वा तुत्थकाह्वये" सुश्रु०। [२। "तेदनीं देवतां प्रीणामि" वेददी०।

**तेदनी** स्त्री देवताभेदे "तेदनीमधरकण्ठेनापः" यजु० २५।

**तेन** अ०तद्+बा०एन। १तद्धेतुनेत्यर्थे भरतः। ते इति न इति शब्दौ यत्र। २गानाङ्गभेदे पु०। "तेनेति शब्दस्तेनः स्यान्मङ्गलानां प्रदर्शकः। तेशब्देनोच्यते गौरी नशब्देनोच्यते हरः। तेन माङ्गलिकश्चायं शब्दस्तेन इति स्मृतः" सङ्गी० दा०।

**तेप** कम्पे, च्युतौ च भ्वा० आ० अक० सेट्। तेपते अतेपिष्ट। तितेपे। ऋदित्। अतितेपत् न।

**तेम** पु० तिम-घञ्। आर्द्रीभावे। अमरः।

**तेमन** न०तिम-ल्युट्। १आर्द्रीकरणे। कर्मणि ल्युट्। २व्यञ्जने। अमरः। आधारे ल्युट् ङीप्। ३चुल्लीभेदे हेमच०।

**तेलु** पु०नृपभेदे ततः राजन्या०विषये देशे वुञ्। तैलवक तेलुनृपविषये देशे। [तितेवे। ऋदित् अतितेवत् न।

**तेव** क्रीड़ने भ्वा० आ० अक० सेट्। तेवते अतेविष्ट।

**तेवन** न०तेव-भावे ल्युट्। १क्रीड़ायाम्। आधारे ल्युट्। २केलिकानने हेमच०।

**तैङ** पु०तिङां व्याख्यानः ग्रन्थः अञ्। तिङां व्याख्याने ग्रन्थे

**तैजस** न० तेजसो विकारः अण्। १घृते, २धातुद्रव्यमात्रे च। साङ्ख्योक्ते ३रजोगुणोत्पन्ने त्रि०। "वैकारः सात्त्विको नाम तैजसः राजसः स्मृतः। भूतादिस्तामसस्तेऽपि पृथक् तत्त्वान्यवासृजन्" पदार्थादर्शधृतवाक्यम्।

"सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का०। "ननु यदि सत्वतमोभ्यामेव सर्वं कार्य्यं जन्यते तदा कृतमकिञ्चित्करेण रजसेत्यत आह तैजसादुभयं तैजसात् राजसादुभयं गणद्वयं भवति। यद्यपि रजसो न कार्य्यान्तरमस्ति तथापि सत्वतमसी स्वयं क्रियासमर्थे अपि न स्वस्वकार्य्यं कुरुतः रजस्तु चलतया ते यदा चालयति तदा स्वस्वकार्य्यं कुरुत इति तदुभयस्मिन्नपि कार्य्ये सत्वतमसोः